# ॥ પ્રણામપ્રણયસ્તવમ્ ॥

.. praNAmapraNayastavam ..

sanskritdocuments.org

August 20, 2017

# .. praNAmapraNayastavam ..

# ॥ પ્રણામપ્રણયસ્તવમ્ ॥

## Sanskrit Document Information

Text title : praNAmapraNayastavam

File name : praNAmapraNayastavam.itx

Category : deities_misc

Location : doc_deities_misc

Language : Sanskrit

Subject : philosophy/hinduism/religion

Transliterated by : PSA Easwaran psaeaswaran at gmail.com

Proofread by : PSA Easwaran psaeaswaran at gmail.com

Description-comments : Devi book stall, Kodumgallur, Kerala

Source : Sthothra Rathnaakaram, edited by N. Bappuravu, 2010

Latest update : August 6, 2016

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

August 20, 2017

*sanskritdocuments.org*

# ॥ પ્રણામપ્રણયસ્તવમ્ ॥

કન્દર્પકોટિરમ્યાય સ્ફુરદિન્દીવરત્વિષે ।
જગન્મોહનલીલાય નમો ગોપેન્દ્રસૂનવે ॥ ૧॥

કૃષ્ણલાકૃતહારાય કૃષ્ણલાવણ્યશાલિને ।
કૃષ્ણાકૂલકરીન્દ્રાય કૃષ્ણાય કરવૈ નમઃ ॥ ૨॥

સર્વાનન્દકદમ્બાય કદમ્બકુસુમસ્રજે ।
નમઃ પ્રેમાવલમ્બાય પ્રલમ્બારિકનીયસે ॥ ૩॥

કુણ્ડલસ્ફુરદંસાય વંશાયત્તમુખશ્રિયે ।
રાધામાનસહંસાય વ્રજોત્તંસાય તે નમઃ ॥ ૪॥

નમઃ શિખણ્ડચૂડાય દણ્ડમણ્ડિતપાણયે ।
કુણ્ડલીકૃતપુષ્પાય પુણ્ડરીકેક્ષણાય તે ॥ ૫॥

રાધિકાપ્રેમમાધ્વીકમાધુરીમુદિતાન્તરમ્।
કન્દર્પવૃન્દસૌન્દર્યં ગોવિન્દમભિવાદયે ॥ ૬॥

શૃઙ્ગારરસશૃઙ્ગારં કર્ણિકારાત્તકર્ણિમ્ ।
વન્દે શ્રિયા નવાભ્રાણાં બિભ્રાણાં વિભ્રમં હરિમ્ ॥ ૭॥

સાધ્વીવ્રતમણિવ્રાતપશ્યતોહરવેણવે ।
કલ્હારકૃતચૂડાય શઙ્ખચૂડભિદે નમઃ ॥ ૮॥

રાધિકાધરબન્ધૂકમકરન્દમધુવ્રજમ્ ।
દૈત્યસિન્ધુરપારીન્દ્રં વન્દે ગોપેન્દ્રનન્દનમ્ ॥ ૯॥

બર્હેન્દ્રાયુધરમ્યાય જગજ્જીવનદાયિને ।
રાધાવિદ્યુદ્વૃતાઙ્ગાય કૃષ્ણામ્ભોદાય તૈ નમઃ ॥ ૧૦॥

પ્રેમાન્ધવલ્લવીવૃન્દલોચનેન્દીવરેન્દવે ।
કાશ્મીરતિલકાઢ્યાય નમઃ પીતામ્બરાય તે ॥ ૧૧॥

ગીર્વાણેશમદોદ્દામદાવનિર્વાણનીરદમ્ ।
કુન્દુકીકૃતશૈલેન્દ્રં વન્દે ગોકુલબાન્ધવમ્ ॥ ૧૨॥

દૈન્યાર્ણવે નિમગ્નોઽસ્મિ મન્તુગ્રાવમદાર્દિતઃ ।

દુષ્ટે કારુણ્યપારીણ મયિ કૃષ્ણ કૃપાં કુરુ ॥ ૧૩॥

આધારોઽપ્યપરાધાનામવિવેકહતોઽપ્યહમ્ ।
ત્વત્કારુણ્યપ્રતીક્ષોઽસ્મિ પ્રસીદ મયિ માધવ ॥ ૧૪॥

ઇતિ પ્રમાણપ્રણયસ્તવં સમાપ્તમ્ ॥

Proofread by PSA Easwaran psaeaswaran at gmail.com

.. praNAmapraNayastavam ..

Searchable pdf was typeset using XeTeXgenerateactualtext feature of XƎLaTeX 0.99996

on August 20, 2017

Please send corrections to *sanskrit@cheerful.com*